# ज्योतिषशास्त्रदृशा ग्रहणविचारः

**उपेन्द्रप्रसादभट्टराई**

*सहप्राध्यापकः, वाल्मीकिविद्यापीठम्*

btraiupndra@gmail.com

**लेखसारः**

*पौरस्त्यवाङ्मयसम्बद्धज्योतिषग्रन्थेषु सूर्याद्या नवग्रहाः प्रसिद्धाः सन्ति । तेषु नवग्रहेषु मध्ये चन्द्रसूर्यौ प्रकाशकत्वेन ग्रहराजत्वेन च परिचितौ स्तः । कदाचित्पिण्डावरोधवशेन तयोःप्रकाशादर्शनं जायते तदेव ग्रहणमिति लोके प्रसिद्धमस्ति ।अतो हि लघुलेखेऽस्मिन् चन्दसूर्यग्रहणद्वयस्य धार्मिकदृशा ज्योतिषशास्त्रदृशा च सफलं विमर्शनं विहितमस्ति । एतत्क्रमे ग्रहणपरिभाषा, ग्रहणकारणम्, गहणभेदाः, ग्रहणविषयिकी पौराणिकी मान्यता, ग्रहणकालः, ग्रहणविषयकमैतिह्यञ्चेति विषया वर्णिताःसन्ति । वैज्ञानिकदृशा च विवेचितमिदं ग्रहणद्वयं ज्योतिर्जगति महत्त्वपूर्णं मन्यते । वैज्ञानिकानां मते  ग्रहणन्तु चमत्कारावस्थाविशेषम् । नूनमपि  धर्मप्राणाःसज्जनाःस्वकीयधर्मसंस्कृतौ विश्वासं कुर्वन्ति । ग्रहणस्य धार्मिकं महत्त्वं धर्मशास्त्रादिषु यथा प्रतिपादितं तथैवात्रापि प्रदर्शितमस्ति । एवमेवात्र ग्रहणे त्रिकालस्नानमहत्त्वं मन्त्रजपमहत्त्वं दानमहत्त्वञ्च प्रतिपादयन् गोचरवशेन जायमानदुष्टफलनिवारणार्थं शान्तिविधिश्च वर्णितोऽस्ति।*

**शब्दकुञ्जी**

उपवासः, खग्रासः,ग्रहणम्, तमोमयः, नन्द, पर्व, वलयः

## विषयपरिचयः

वेदाङ्गत्वेन प्रथितेषु ज्योतिषशास्त्रेषु यत्र तत्र महत्त्वं वर्णितयोश्चन्द्रसूर्ययोर्भूभासम्बन्धवशात् तमोमयराहोर्ब्रह्मवरसकाशात् शिववरप्रसादादुत्पन्नसामर्थ्याच्चाकाशीयपिण्डविशेषाणामवरोधात् स्वकीयचारवशाच्च कदाचित् पर्वकाले चन्द्रसूर्ययोः प्रकाशादर्शनं सम्भवति तदेव लोके  ग्रहणमिति कथ्यते । नूनमपि ग्रहणविषयविवेचनप्रसङ्गे ग्राह्यग्राहकयोःसम्बन्धोऽपेक्षितो भवति । ग्राहको यदा ग्राह्यं  गृह्णाति तदा ग्रहणम् । ग्रहणे ग्राह्यग्राहकयोरन्तराभावत्वमत्यावश्यकम् । अत एव निःशेषेण कथयितुं शक्यते यत् ग्राह्यग्राहकयोरन्तराभावत्वं ग्रहणत्वमिति ।

सर्व एव ग्रहाः स्वस्वकक्षायामाकाशे पृथिवीं परितो भ्रमन्ति । सर्वासामपि ग्रहकक्षाणां केन्द्रं भूगर्भः । अतो ग्रहाणां कक्षाक्रमानुरोधेन केवलं पूर्वापरान्तराभावे ग्रहणे स्वीकृते प्रतिपर्व ग्रहणं सम्भाव्यते । परन्तु चैतन्न सम्भवति । तेन यदा यदा ग्राह्यग्राहकयोः पूर्वापरान्तराभावो याम्योत्तरान्तराभावश्च भवति तदैव ग्रहणं सम्भवति ।

चन्द्रग्रहणे पूर्वगत्या चन्द्रः खलु भूच्छायायां प्रविशति। अतश्चन्द्रग्रहणे चन्द्रश्छाद्यः छादिका च भूभा। सूर्यग्रहणे सूर्यकक्षातोऽधोगतश्चन्द्रो सूर्यभूबिम्बयोर्मध्यगतो भवति। अतोऽधोगतेन चन्द्रबिम्बेनाच्छादितस्य सूर्यबिम्बस्यादर्शनात् सूर्यग्रहणम्। तत्र छाद्यो रवि छादकश्चन्द्र इति गोलविदां स्फुटमेव।

## समस्याकथनम्

काश्चन समस्या यथा सन्ति लेखलेखनसन्दर्भे समागताः। ताश्च यथा —

१.किमर्थं प्रतिपर्व ग्रहणं न सम्भवति ?

२. ग्रहणस्य धार्मिकं वैज्ञानिकञ्च महत्त्वं कथं प्रतिपादितमस्ति ?

३. ग्रहणविषयकफलसमीक्षणं कथं कृतमस्ति शास्त्रान्तरेषु ?

## लेखलेखनस्योद्देश्यम्

लेखस्यास्योद्देश्यानि अधोलिखितानि सन्ति।

१. प्रतिपर्व ग्रहणासम्भवत्वे कारणनिदर्शनम् ।

२. ग्रहणस्य धार्मिक– वैज्ञानिकमहत्त्वप्रतिपादनम्।

३.ग्रहणविषयकफलसमीक्षणम्।

## अध्ययनविधिः

अस्मिन् लेखे सामग्रीसङ्कलनाय पुस्तकालयीयविधेरुपयोगःकृतो वर्तते । अध्ययनविधौ मुख्यरूपेण निगमनात्मकविधिरेव समवलम्बितोऽस्ति । एतदतिरिक्तं यथावसरं प्रतिपाद्यविषयानुरोधेन व्याख्यान–विश्लेषण–तुलनात्मकाद्या विधयोऽपि प्रयुक्ताःसन्ति। ज्योतिषसम्बद्धग्रन्था लेखाश्चात्र सामग्रीरूपेण समादृताः सन्ति।

## सैद्धान्तिकपर्याधारः

वस्तुतःसैद्धान्तिकाधारं विना किमपि विषयजातं निरर्थकं समायाति। ज्योतिषं नूनमपि फलित-सिद्धान्तरूपेण पुष्पितं पल्लवितं समादृतं व्यवहृतञ्चास्ति जनसमाजे। सिद्धान्तज्योतिषं विना फलितं फलितज्योतिषं विना सिद्धान्तश्च न्यूनतां याति । अतो हि **ज्योतिषशास्त्रदृशा ग्रहणविचारः** शीर्षकान्विते लघुलेखे सगणितं केचन फलितसिद्धान्ताःसमवलम्बिताःसन्ति। तेनैव प्रकारेण मुहूर्तग्रन्थानां मध्ये मुहूर्तचिन्तामणिस्तदीयश्लोका व्याख्यानं टीका चाधारत्वेन सङ्गृहीताःसन्ति। एवमेव वराहविरचिता बृहत्संहिता, भट्टकमलाकरविरचितनिर्णयसिन्धुः, भास्करविरचितः सिद्धान्तशिरोमणिश्चैते ग्रन्थास्तेषां प्रमाणवचनानि तट्टीकाकाराणां सम्बद्धशास्त्रवचनानि च पर्याधारत्वेन स्वीकृतानि सन्ति।

## ग्रहणस्येतिवृत्तम्

सूर्य आत्मा जगतस्तस्थुषश्च इति सूर्यस्य महात्त्वप्रतिपादिका श्रुतिर्जीवजगतो दिनकरस्य ब्रह्मविष्णुशिवाभिधानत्रिमूर्तिरूपस्य सूर्यस्य च महिमानं शतशः समुद्गिरति । काले काले जगज्जीवनसूर्यचन्द्रयोरुपरागयोगो नाम वर्तते कश्चन ज्योतिःशास्त्रे वर्णितो लौकिकैर्जनैश्चानुभूतो ह्याकाशीयश्चामत्कारदृश्यघटनाविशेषः । ग्राह्यग्राहकपिण्डविशेषेण ग्रहणसम्भवत्वे सूर्यचन्द्रयोर्ग्रहणन्तु सर्वज्योतिर्विन्मनसि प्रामुख्येण विलसति । नवग्रहाणां महत्त्वं स्वस्वस्थाने मानवजगति भवत्येव परञ्च सूर्यचन्द्रयोर्महत्त्वं ततोऽप्यधिकं भवत्यत्र न कोऽपि शङ्कापङ्कलेशः । सूर्यग्रहणस्य चन्द्रग्रहणस्य च प्राचीनः समुल्लेखः सर्वप्राचीने ग्रन्थे ऋग्वेदे विद्यते । ऋग्वेदेषु प्रदर्शितेषु बहुमन्त्रेषु सूर्यग्रहणस्य चामत्कारिकं विवरणं प्राप्यते । तत्र वर्णितं विद्यते यत् स्वर्भानुः सूर्यमतिक्रम्य तमसा तं विद्धवान् येन कारणेन तदानीन्तमकाले पृथ्वीलोकवासिनो मानवास्तद्रूपं निरवशेषेण द्रष्टुं नापारयन् स्वस्वकार्येषु च ते विमुग्धा अभवन् । तदा ब्रह्मनेत्रसमुद्भवेन महर्षिणात्रिणा समधिगताखिलतपोबलेन नानामन्त्रैर्मायांशप्रभावं विदार्य जगत्प्रसूतिस्थितिनाशकारकस्य सूर्यस्य समुद्धारो विहितः । एतस्मिन् विषये वेदेषु जागर्ति गर्जति च अनसूयाधवस्य महर्षेरत्रेः किमप्यलौकिकं तपोबलसमुद्भूतं प्रभावजातम् यथा—

*स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन् ।*

*गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ॥ (ऋग्वेद ५।४०।६)*

अन्यस्मिन् मन्त्रे (५।४०।८) एतद्विषयेऽत्रिसहायार्थमिन्द्रः सूर्यं दैत्यमायातो जुगोपेति विवरणं प्राप्यते । इत्थं सूर्यग्रहणविषये मुक्तिप्रदे कर्मणि महर्षेरत्रेरेवातिशायि सामर्थ्यमासीदिति तथ्यं सुस्पष्टं भवति । केन सामर्थ्येनात्रिरेवंभूतमलौकिकं व्यापारं कर्तुं समर्थोऽभवदिति विषये द्वैविध्यं वर्तते वेदानुशीलानां विपश्चिताम् । तत्रैके तपोबलादुत्पन्नं ज्योतिर्विषयकं पाटवमेवात्र कारणमिति कथयन्ति । किमपि नवीनंयन्त्रं विधाय महर्षिरत्रिर्ग्रहणादुन्मुक्तं सूर्यं पृथ्वीतलनिवासिनां मानवानां कृते द्रष्टुमपारयदिति मधुसूदन–ओझा महोदयः स्वनिर्मितग्रन्थे अत्रिख्यातिनाम्नि प्रतिपादयति । इत्थं सम्यग्गते पुरातनकाल एव वैदिकाः पुरुषाः ग्रहणविषये ज्योतिःशास्त्रविषयकेण प्रकृष्टज्ञानेन मण्डिता आसन्नीति विषये नास्तीति कस्यचिद् वैमत्यम् ।

## चन्द्रग्रहणम्

सूर्यभ्रमणवृत्तं क्रान्तिवृत्तं कथ्यते । सूर्याद् विपरीतदिशि अन्धकारमयी भुवश्छाया षड्राश्यन्तरे सदैव भ्रमति । यदि कदाचित् स्वकक्षायां भ्रमन् चन्द्रः तस्यां भूभायां प्रविशति चेत् चन्द्रबिम्बं प्रकाशराहित्यं दृश्यते । एतदेव जगति चन्द्रग्रहणमुच्यते । एतादृशी स्थितिस्तु पूर्णान्तकाले एव भवति । अतश्चन्द्रग्रहणं पौर्णमास्यामेव संजायते ।

## सूर्यग्रहणम्

पृथ्वीमभितो भ्रमन् चन्द्रो यदा भूपृष्ठस्थदर्शकसूर्ययोर्मध्ये व्यवधानरूपेण तिष्ठति तदा चन्द्रव्यवधानकारणात् सूर्यस्य किञ्चित् भागोऽदृश्यतां याति । ईदृशं सूर्यस्यादर्शनं सूर्यग्रहणमित्युच्यते। अतःसूर्यग्रहणे चन्द्रसूर्ययोरन्तराभावत्वं दरीदृश्यते ॥

## प्रतिपर्व ग्रहणं किमर्थं न भवति ?

चन्द्रग्रहणं पौर्णमास्यां तिथौ तथा रविग्रहणममावस्यां तिथौ लगतीति प्रसिद्धमस्ति । परन्त्वेतत्सर्वदा न सम्भवति । गणितदृशा विचार्यते चेद् ग्रहणं हि मानैक्यार्धाल्पे शरे सति सम्भवति । चन्द्रश्च चन्द्रग्रहणसमये रवितो भार्धान्तरे भवति । तत्र भूभाऽपि रवेर्विपरीतदिशि भवत्येव । एतादृश्यां स्थितौ चन्द्रभूभयोःसमत्वं जायते । भानुतुल्ये पाते विराह्वर्कःशून्यसमः । भूभातुल्ये च विराह्वर्कःषड्राशिसमः । उभयत्र भुजाभावात् शरःशून्यसमो मानैक्यार्धादल्पो ग्रहणस्य कारकः । चन्द्रग्रहणे सपातार्कस्य भुजः सपातचन्द्रस्य भुजेन समः ।मध्यमसपातार्कस्य भुजभागैश्चतुर्दशमितैग्र्रहणस्य सम्भवः । एवमत्र परममानैक्यखण्डसमे शरे ये सपातार्कभुजभागा भागद्वयाधिकास्तत्र ग्रहणसम्भवः । परमाल्पमानैक्यखण्डसमे शरे ये भुजभागा भागद्वयोनास्तत्र ग्रहणसम्भवः । एवं परममानार्धान्तरतुल्ये शरे ये भुजभागा भागद्वयाधिकास्तत्र सर्वग्रहस्य सम्भवः । तथैव परमाल्पमानार्धान्तरसमे शरे ये भुजभागा भागद्वयोनास्तत्र सर्वग्रहस्य सम्भवः । एवमेव विपातचन्द्रस्य भुजांशाः१४ मितास्तदा ग्रहणसम्भवो भवति । यदा ९ परिमिता भुजांशास्तदा ग्रहणं निश्चितरूपेण भवतीति ज्ञायते । तथैव ८ परिमिते सर्वग्रहणस्य सम्भावना भवति चेत् २ परिमिते निश्चितरूपेण सर्वग्रहणं भवत्येवेति सुधाकरः कथयति सुधावर्षिण्याम् । तद्वचनञ्च यथा—

*मन्वङ्कनागाश्विलवोनका यदा विपातचन्द्रस्य भुजांशकास्तदा ।*

*स्यात् सम्भवोऽवश्यमथात्र शीतगोग्र्रहस्य सर्वग्रहणस्य च क्रमात् ॥*

एतदुक्तं भवति यदा यदा पर्वमध्ये तादृशी स्थितिर्जायते तदा तदा एव ग्रहणसम्भवत्वं न त्वन्यत्र । अतो हि प्रतिपर्व ग्रहणं न सम्भवति ।

## ग्रहणभेदविचारः

मुख्यतया चन्द्रसूर्यग्रहणयोरवस्थाविशेषेण चत्वारो भेदा दृश्यन्ते । तेषां परिचयोऽधः प्रस्तूयते ।

## पूर्णग्रहणम्

यदि स्वकक्षायां भ्रमतश्चन्द्रस्य पूर्णं बिम्बं भूभायां प्रविशति तर्हि पूर्णचन्द्रग्रहणं भवति । एवं यदा चन्द्रबिम्बेन सूर्यस्य पूर्णबिम्बमाच्छाद्यते तदा सूर्यस्य पूर्णग्रहणं भवति । नीचस्थिते चन्द्रे एतादृशी स्थितिर्भवति ।

## खग्रासग्रहणम्

सूच्यां मध्ये यदा दृष्टिस्थानं भवति, तदा दृश्यचन्द्रकलाभ्यो रविबिम्बकलामानमल्पत्वात् खग्राससम्भवं जायते । अथवा ग्राह्यविम्बमाच्छाद्य ग्राहकविम्बं नभो मण्डलमपि किञ्चिदाच्छादयेत्तदा खग्रासग्रहणं भवति ।

## खण्डग्रहणम्

यदा तु चन्द्रस्य किञ्चिद्भाग एव भूभायां प्रविशति तदा खण्डग्रहणं भवति । एवं यदा सूर्यचन्दसंलग्नरेखातो भूपृष्ठस्थदर्शककेन्द्रसंलग्नरेखा भिन्ना भवति तदा चन्द्रबिम्बं सूर्यस्य किञ्चिद्भागमाच्छाद्य निर्गच्छति तदा सूर्यस्य खण्डग्रहणं जायते ।

**वलयग्रहणम्**

यदा विपुलसूर्यबिम्बमध्ये वृत्ताकारं कृष्णं लघु चन्द्रबिम्बं पतति तदा अनुज्ज्वलचन्द्रबिम्बं परित उज्ज्वलं सूर्यबिम्बं वलयानुरूपं दृश्यते तदा वलयग्रहणम्। चन्द्रस्य कृते एतन्न सम्भवति।

## ग्रहणविषयकफलादेशकथनम्

ज्योतिषविषयसम्बद्धं सकलमपि विषयजातं फलादेशप्रधानमिति पुराणगणकैरुक्तत्वाद् ज्योतिषशास्त्रस्य फलादेशप्रकथनमेव प्रमुखमुद्देश्यमस्ति। अत एतत्सम्बद्धं फलादेशविधानं शास्त्रान्तरादन्विष्य प्रस्तूयते।

## एकमासावधिकचन्द्रसूर्यग्रहणफलम्

ग्राह्यग्राहकयोरन्तराभावत्वे ग्रहणत्वे सति सूर्य–भूभाचन्द्राणां मध्येषु सूर्यचन्द्रसम्बन्धात् चन्द्रभूभासम्बन्धाच्च जायमाने सूर्यचन्द्रग्रहणे सर्वातिशायि महत्त्वं प्रख्यापयतः। यदा मासाभ्यन्तरे सूर्यचन्द्रयोग्र्रहणं समापतति तदा लोके सर्वेऽवनीशाः स्वबलक्षोभैः संक्षयमायान्ति। एवञ्च सर्वे जयिनो नृपाः परस्परं संग्रामिकोपेताः सामरिकाश्च दृश्यन्ते। तथाह वराहः—

*यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः।*

*स्वबलक्षोभैः संक्षयमायान्त्यतिशस्त्रकोपाश्च ॥(बृहत्संहिता ,५।२६)*

सामान्यरूपेणैकस्मिन् चान्द्रमासे शुक्लादिगणनातः पञ्चदश्यां तिथौ (पौर्णमास्यां) चन्द्रग्रहणस्य सम्भवत्वं तथा ततः पञ्चदशदिनानन्तरिते सति अमायां सूर्यग्रहणस्य सम्भवत्वं दृश्यते। एतत्तु पक्षान्तरितं भवति। अतोऽन्येऽधिमासापतिते सति एतत्सम्भवविति निगदन्ति। एतत्सत्यमौत्पातिकं भवति। एतत्समर्थयन् वराहः कथयति बृहत्संहितायां राहुचारे

*सतमस्कं पर्व विना त्वष्टा नामार्कमण्डलं कुरुते।*

*स निहन्ति सप्तभूपान् जनाश्च शस्त्राग्नि दुर्भिक्षैः ॥ (बृहत्संहिता ,३।६)*

यद्येकस्मिन् मासे ग्रहणद्वयं भवति चेत्तदा पृथिव्यामनिष्टं जायते। एतत् सदृशं ग्रहणमौत्पातिकं कथ्यते। तत्फलं ग्रन्थान्तरे एवमेव प्रदर्शितमस्ति –

*चन्द्रसूर्याविभौ ग्रस्तावेकमासे त्रयोदशे।*

*अपर्वणि ग्रहावेतौ प्रजाः सङ्क्षपयिष्यतः॥ (बृहत्संहिता ,३।६, विवृतिटीका)*

## ग्रस्तोदितास्तफलम्

ग्रहणकाले चन्द्रो यदा ग्रस्तोदितो ग्रस्तास्तमितो वा भवति तदा शारदधान्यस्य क्षयकरी भवत्येतादृशश्चन्द्रः। एवं ग्रस्तोदितो ग्रस्तास्तमितश्चार्कोऽवनीश्वरस्य क्षयकरी भवति। सर्वत्र सर्वजनमनसि त्रासोत्पादकावेतौ द्वौ चन्द्रसूर्यौ

सर्वग्रस्तौ पापसन्दृष्टौ भवतस्तदा दुर्भिक्षं जनमरकञ्च दत्तः । एवञ्च राष्ट्रे जनपदानां वरिष्ठजनानां जनाधिपानाञ्च नाशं जनयतः । प्रजाश्च ग्रैष्मेणाम्बुफलेन जीवन्ति भयदुर्भिक्षरोगैश्च सम्पीडिता भवन्ति । उक्तञ्च यथा –

*ग्रस्तावुदितास्तमितौ शरदधान्यावनीश्वरक्षयदौ ।*

*सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसन्दृष्टौ ॥ (बृहत्संहिता ,५।२७)*

## अयनवशेन चन्द्रसूर्यग्रहणफलम्

मकरादिराशिषट्के स्थिते सूर्ये उत्तरमयनं कर्कटादिराशिषट्के स्थिते सूर्ये दक्षिणमयनमिति तावदयनपरिभाषेति सर्वे ज्योतिर्विदो जानन्त्येव । यदा उत्तरायणकाले चन्द्रसूर्यौ राहुणा ग्रस्तौ दृश्येते तदा द्विजाः नृपतयः क्षत्रियाश्च विनाशनमुपगच्छन्ति । तथैव दक्षिणायनकाले राहुग्रस्तौ तावेव द्वौ ग्रहौ दृश्येते तदा राहुदर्शनादेव वैश्यजातीयाः शूद्रजातीया जना विनश्यन्ति । उक्तञ्च—

*द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हन्ति ॥ (बृहत्संहिता ,५।३२)*

## चन्द्रसूर्यग्रहणे दिक्परत्वेन फलकथनम्

ज्यौतिषमागमशास्त्रमस्ति । अतः फलकथने गणितदृष्ट्याऽसम्भवत्वेऽपि कतिचन प्रसङ्गे पूर्ववर्तिनामाचार्याणामनुसरणन्तु सर्वथाऽऽचार्यपरम्परातः प्रसिद्धमस्ति अत्राऽपि सूर्यचन्द्रयोग्ग्रहणेऽष्टसु दिक्षु प्रग्रहणाभावेऽपि फलन्तु तथाविधं प्राप्यते । यतो हि ग्राह्यग्राहकयोस्थितिभेदेन सूर्यस्य स्पर्शः पश्चिमदिशि मोक्षस्तु पूर्वस्याम् । चन्द्रग्रहणे तु पूर्वदिशि स्पर्शो मोक्षस्तु पश्चिमदिशि सम्भवति । परञ्चोत्तरस्यां दक्षिणस्यां न भवति । काश्यपपराशरादयस्तु चन्द्रसूर्ययोग्ग्रहणे दिक्परत्वेनेत्थं फलं कथयन्तीति भट्टोल्पलो निगदति स्वकीयटीकायाम् —

*सौम्यायामागतो विप्रान् पूर्वस्यां क्षत्रजातयः ।*

*वैश्यान् दक्षिणतो राहुर्हन्ति पश्चिमतो परान् ॥ (बृहत्संहिता ,५।३२, विवृतिटीका)*

## नक्षत्रवशेन ग्रहणफलम्

नक्षरतीति नक्षत्रं तावन्नक्षत्रपरिभाषेति । स्थिरगतिकानि नक्षत्राणि प्राच्यज्योतिषपरम्परायां सप्तविंशतिसंख्यकानि अश्विन्यादिरेवत्यन्तानि सुप्रसिद्धानि सन्ति । यस्मिन् समये ग्रहणं दृश्यते तस्मिन् समये यन्नक्षत्रे चन्द्रसूर्यौ भवतस्तन्नक्षत्रजं फलं कूर्मविभागेन वक्तव्यम् ।

*भफलं कूर्मोपदेशाद्वदेत् ॥(बृहत्संहिता ,५।४२)*

## पक्षान्ते ग्रहणफलम्

सूर्यग्रहणममावस्यायां पौर्णमास्यां तु चन्द्रग्रहणं लगतीति सर्वे जानन्त्येव । एकस्मिन् चान्द्रमासे पक्षद्वयं भवति । यदि प्रथमममायां सूर्यग्रहणं भवति ततः पञ्चदशदिनानन्तरं पौर्णमास्यां चन्द्रग्रहणं भवति तदा किं फलं भवति ? पुनर्यदि

पूर्णिमायां चन्द्रग्रहणं तदनन्तरं पञ्चदशदिनानन्तरममायां सूर्यग्रहणं भवति तदा किं फलं भवति ? इत्यस्मिन् विषये वराहमतं यथा —

चन्द्रग्रहणे निवृत्ते पक्षान्ते यदि सूर्यस्य ग्रहणं भवति तत्र प्रजानां दुर्नयो भवति । सर्वत्र प्रजा दुर्नीतिरता दृश्यन्ते । दम्पत्योः परस्परं कलहो भवति ।

*सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्य ।*

*तत्राऽनयः प्रजानां दम्पत्योर्वैरमन्योन्यम् ॥ (बृहत्संहिता ,५।९७)*

सूर्यग्रहणानन्तरं पक्षान्ते यदि चन्द्रमसोर्ग्रहणं दृश्यते तदा ब्राह्मणा बहूनां यज्ञानां फलभागिनो भवन्ति । तथा सर्वाः प्रजा मुदिताः भवन्ति । सर्वब्राह्मणवर्गोऽपि प्रमुदितो भवति ।

*अर्कग्रहात्तु शशिनो ग्रहणं यदि दृश्यते ततो विप्राः ।*

*नैकक्रतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव ॥ (बृहत्संहिता ,५।९८)*

## ग्रहणनक्षत्रफलं जन्मनक्षत्रजन्यं ग्रहणफलञ्च

जन्मनक्षत्रे ग्रहणे सति तन्नक्षत्रजातानां मृतिः स्यादिति समर्थयन् वसिष्ठः कथयति—

*यस्यैव जन्मनक्षत्रे ग्रस्येते शशिभास्करौ ।*

*तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः ॥ (मुहूर्तचिन्तामणिः १।३३, पीयूषधाराटीका)*

अर्थात् यस्यजन्मनक्षत्रे चन्द्रस्य सूर्यस्य वा ग्रहणं भवति तदा तत्रजातस्य कृते पीडा भवति । ये शान्तिविधिना शान्तिं न कुर्वन्ति ते पीडिता भवन्ति । इतोऽपि विशेषं भार्गवीये—

*यस्य राज्यस्य नक्षत्रे स्वर्भानुरूपरज्यते ।*

*राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्दिशेत् ॥ (मुहूर्तचिन्तामणिः १।३३, पीयूषधाराटीका)*

अर्थात् यस्य कस्यापि राज्यस्य नक्षत्रे ग्रहणं दृश्यते तदा तद्राज्यस्य भङ्गो भवति । सुहृदां मरणमपि जायत इति ।

अत्राऽपि ग्रस्तेऽस्तगे पूर्वं त्रिदिनं नेष्टं भवतीति प्रतिपादितम् । ग्रस्तोदये परस्तात्पश्चिमदिनत्रयं नेष्टं पूर्वं सम्यक् त्रिदिनमित्यर्थोऽभिहितः । तथा अर्धखण्डे ग्रस्तोदयग्रस्तास्तयोरभावेऽपि अर्धग्रासे उभयोः कालयोः प्राक्पश्चात् त्रिदिनं नेष्टम् । अस्मिन् विषये गुरुवचनम् यथा—

*ग्रस्तास्ते त्रिदिनं पूर्वं पश्चाद् ग्रस्तोदये तथा ।*

*खण्डग्रासे त्रित्रिदिनं निःशेषे सप्त सप्त च ॥*

(मुहूर्तचिन्तामणिः १।३३, पीयूषधाराटीका)

इति सर्वशास्त्रकाराणां मतानि समालोड्य सुष्ठु चोक्तमस्ति रामदैवज्ञेन मुहूर्तचिन्तामणौ—

*नेष्टं ग्रहर्क्षं सकलार्धपादग्रासे क्रमात्तर्कगुणेन्दुमासान् ।*

*पूर्वं परस्तादुभयोस्त्रिघस्रग्रस्तेऽस्तगे वाभ्युदितेऽर्धखण्डे ॥*

(मुहूर्तचिन्तामणिः १।३३)

अतः खण्डग्रहणादिसद्भावेऽपि ग्रस्तोदयग्रस्तास्तत्वाभावात्पूर्वपश्चाच्चोक्तदिनानि वर्ज्यानीति सर्वत्र विषयविवेकः ।

## जन्मराशिवशेन सूर्यचन्द्रयोर्ग्रहणफलम्

जन्मराशितो द्वादशसु राशिषु ग्रहणे सति यत्फलं निगदितमस्ति तत्फलमत्र प्रतिपाद्यते । यथा जन्मराशौ ग्रहणे सति शरीरपीडा घातो वा भवति । एवं द्वितीयराशौ क्षतिर्द्रव्यनाशः, तृतीयराशौ लक्ष्मीः, चतुर्थराशौ शरीरपीडा, पञ्चमराशौ पुत्रादीनां चिन्ता, षष्ठराशौ सौख्यम्, सप्तमराशौं स्त्रीमरणम्, अष्टमराशौ मरणम्, नवमराशौ माननाशः, दशमराशौ सुखम्, एकादशराशौ लाभः, द्वादशराशौ मृत्युः । अत्र कथितं सर्वमपि फलं षण्मासपर्यन्तमनुक्तमपि ध्येयम् । तदुत्तरं हि ग्रहणान्तरसम्भवात् ।

इत्थमालोडने कृते रामदैवज्ञस्य मुहूर्तचिन्तामणौ स्थापितवचनञ्चातीव समीचीनं प्रतिभाति।।

*जन्मर्क्षे निधनं ग्रहे जनिभतो घातः क्षतिः श्रीव्र्यथा*
*चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशःसुखम् ।*
*लाभोपाय इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्णगो–*
*दानं शान्तिरथो ग्रहं त्वशुभदं नोवीक्ष्यमाहुः परे ।।*

(मुहूर्तचिन्तामणिः ४।६)

## ग्रहणविषये भास्करमतम्

ज्योतिषधर्मशास्त्रयोः सम्बन्धस्तु पुरातनकालादेव नखमांशयोरिवास्तीति नाविदितमेव तद्विषयविलासरसरसिकानाम् । अतो नास्तिकास्तिकभेदेन द्वैविध्यं गतवति लोके ग्रहणविषयरसिकानां विपश्चितां नितरां प्रमोदायोभयञ्च पक्षं प्रदर्शयता भास्करभक्तेन भास्कराचार्येण निगदितमस्ति ।

*बहुफलं जपदानहुतादिके स्मृतिपुराणविदः प्रवदन्ति हि ।*
*सदुपयोगिजने सचमत्कृति ग्रहणमिन्द्विनयोःकथयाम्यतः ।।*

(सिद्धान्तशिरोमणिः,१०।१)

## धर्मशास्त्रदृशा ग्रहणे कृत्याकृत्यविचारः

स्मृतिपुराणानुशीलानामास्तिकजनानां ग्रहणसमयस्त्वपेक्षितो न सामान्यो दुर्लभ एव । अतो जपदानहवनप्रभृतिभिः श्रौतस्मार्तकर्मभिर्निःश्रेयसधर्मपुण्यप्राप्तये यत्नो विधेयः । अतोऽत्रास्मिन् प्रसङ्गे धर्मशास्त्रदृशा ग्रहणे कृत्याकृत्यविचारो विधीयते—

**ग्रहणे भोजनविचारः**

तत्र चन्द्रग्रहणे यस्मिन् यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भोजनं कर्तव्यम् । सूर्यग्रहणे तु प्रहरचतुष्टयं न भोजनमर्थात् चन्द्रग्रहणे ग्रहणात् प्राक् नवहोरात्मकः कालस्तथा सूर्यग्रहणे द्वादशहोरात्मकः कालो भोजनाय वर्ज्यो भवति। यथा माधवीये वृद्धगर्गः—

*सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।*

*चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ॥*

(निर्णयसिन्धुः, षष्ठप्रकरणम्, पृ. ११३)

**ग्रहणे उपवासविचारः**

न गृहसुखं सम्भवति सन्ततिं विना मर्त्यलोकनिवासिनां मनुष्याणाम्। अतो ग्रहणसमय एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च यथाशक्ति सर्पस्य कञ्चुकादिव पापराशितो मुक्ता भवन्ति धर्मप्राणा मानवाः । चन्द्रसूर्यग्रहणे त्रिरात्रमुपवासः क्रियते चेत्तदा ब्रह्मणा सह मोदन्ते।

अतो हि ग्रहणे च त्रिरात्रमेकरात्रं चोपवासः श्रेयोऽर्थिना कार्यः । परन्तु यदा तु रवेग्रस्तास्तस्तदा पुत्रिणः प्रहरद्वयं हित्वा बालादिवद् भोजनम् न तूपवासः । सायाह्ने ग्रहणं चेत्स्यात् इति मार्कण्डेयवचनबलाद्। अत्रास्मिन् पक्षे जैमिनिः कथयति– पुत्रवान् गृही रविवासरे, सङ्क्रमदिने चन्द्रसूर्यग्रहणे च पारणमुपवासञ्च न कुर्यात्।

ग्रहणसमये स्पार्शिककाले मौक्षिककाले च स्नानस्य महत्त्वं यथा भवति तथैव सम्पूर्णे ग्रस्ते (सम्मीलनकाले) मुच्यमाने (उन्मीलनकाले) हवनस्य दानस्य त महत्त्वं तत्समानमेव भवति । ग्रहणे आद्यन्तयोः स्नानं कुर्यात् । प्रारम्भे स्नानम्, मध्ये ग्रस्ते हवनम्, मुच्यमाने दानम्, मुक्ते पुनः स्नानमिति हेमाद्रौ, स्नानं हवनमर्चनञ्चेति कर्तव्यमिति ब्रह्मवर्तेऽपि कथनाद् ग्रहणकालावधि स्नानंदानंहवनञ्चेति कर्तव्यमेव।

*ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते।*

*मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते।*

*स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम्॥*

(निर्णयसिन्धुः, षष्ठप्रकरणम्, पृ. ११७)

**ग्रहणकाले स्नानविचारः**

पञ्चमवेदत्वेन विख्याते महाभारते ग्रहणे स्नानमहत्त्वं प्रदर्शयन् विशेषतीर्थादिवर्णनं विहितमस्ति । चन्द्रसूर्यग्रहणसमये श्रेयोऽर्थिभि कैश्चिदपिपुरुषैर्गङ्गादिमहानदीषु सविधि स्नानं कर्तव्यम् । गङ्गादितीर्थानां महत्त्वं पुराणादिषु प्राप्यते। दिङ्मात्रं यथा—

*यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेध राजसूयादीनां फलं न दुर्लभमिति।*

(श्रीमद्भागवत ५।१७।९)

गङ्गां यामीत्युपक्रमं कुर्वत्यपि नरे तस्य पितृणां नरकस्थानां यमपाशबन्धविमोचनं भवति । गच्छति सति तत्पितरो वल्गन्ति । अस्मत्कुलभवो हि जनो गङ्गास्नानार्थं तत्र गच्छतीति कथयन्तः स्वकृतदुष्कर्मविच्छेदनादितः

 ISSN:- 3021-9388

परमूर्ध्वगतेः प्राप्तिरवश्यमेव भविष्यतीति हर्षेणोत्पतन्ति । अथ गङ्गातटे प्राप्ते स्वकुलजे गङ्गाप्रभावाद् यमदूतान् जित्वा देवलोकं यान्ति । एवं विष्णुवामनचरणघाताद् महीतले समागताया एवं विधाया गङ्गाया महत्त्वं प्रदर्शयता स्वसिद्धान्तशिरोमणौ गोलाध्याये श्री भास्करेण निगदितं यथा—

*या कर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ।*
*उक्ता स्मृता स्तुता वा पुनाति बहुधापि पापिनः पुरुषाः ॥*
*यां चलिते दलिताखिलबन्धो गच्छति वल्गति तत्पितृसंघः ।*
*प्राप्ततटे विजितान्तकदूतो याति नरे निरयाद् सुरलोकम् ॥*

(गोलाध्यायः,३९—४०श्लोकौ)

सामान्यकालेऽपि गङ्गास्नानस्य ईदृङ्महत्त्वं नरजातीनां दृश्यते चेत् ग्रहणसमये तु ततोऽप्यधिकतमं शास्त्रेषु वर्णितमस्ति । अतो ग्रहणमुद्दिश्यैव मासविशेषे काश्चिच्छ्रेष्ठा महानद्यः परिपठिताः सन्ति यथा—

कार्तिकमासे ग्रहणे प्रयागे गङ्गा, मार्गशीर्षे देविका, पौषे रेवा, माघे सन्निहत्या, फाल्गुने वरणा, चैत्रे सरस्वती, वैशाखे चन्द्रभागा, ज्येष्ठे कौशिकी, आषाढे तापिनी, श्रावणे सिन्धु , भाद्रमासे गण्डकी, आश्वयुजि सरयू ।

एवं विधासु महानदीषु स्नाने कृते चन्द्रग्रहणे लक्षगुणं पुण्यं प्राप्यते चेत् कोटिगुणं पुण्यं तु रविग्रहणे । अर्थात् दशोत्तरगुणवृद्ध्या फलं फलति । सहस्रहोटिगोदानसमफलं चन्द्रसूर्यग्रहणे स्नानेन मनुष्यो लभत इति।

चन्द्रग्रहणे स्नानार्थं गोदावरी नाम्नी नदी पुण्यप्रदायिनी मन्यते । एवं सूर्यग्रहणे नर्मदा नदी बहुपुण्यप्रदायिनी मन्यते । उभयोरपि ग्रहणयोः जलस्पर्शनमात्रमपि क्रियते तत्र तदाखिलपापराशिभ्यो मुक्तो भवति मानवः ।

## दिने चन्द्रग्रहणे रात्रौ च सूर्यग्रहणे फलविचारः

यदि रात्रौ सूर्यग्रहणं दिने चन्द्रग्रहणं दृष्टं भवेत्तदा स्नानं दानञ्चेति न कर्तव्यमेव । अत एव तादृशे ग्रहणे दृष्टेऽपि दौष्ट्यं न भवतीति सूच्यते ।

## ग्रहणे गोचरवशेन शुभाशुभत्वविचारः

ज्योतिषशास्त्रदृशा मेषाद्यानां द्वादशराशीनां प्राधान्यमश्विन्यादिरेवत्यन्तैः सप्तविंशतिनक्षत्रैः सह फलादेशक्रमे वर्तत इति सुप्रसिद्धमेव । यस्मिन् दिने चारणात् चन्द्रो यस्मिन् नक्षत्रे यस्मिन् राशौ वाऽऽगच्छति तत् दिनसम्बन्धि नक्षत्रं राशिर्वा तदेव कथ्यते । यदि कस्यचिदपि जनस्य स्वराशौ (जन्मराश्यादौ) ग्रहणं भवति तदा तद्ग्रहणं तस्य जनस्य कृतेऽशुभदं भवति । ज्योतिषशास्त्रेकथितमस्ति यत् स्वराशितः त्रिषट्दशायोपगतं ग्रहणद्वयमेव तत्कृतेऽतीवशुभप्रदं भवति एवं स्वराशितः द्वि–नव–सप्तमराशिषु मध्यमफलप्रदं तथा प्रथम–चतुर्थ–पञ्चम–अष्टम–द्वादशराशिषु दृष्टं ग्रहणमशुभफलदं भवति । उक्तञ्च ज्योतिषे—

*त्रिषट्दशाऽऽयोपगतं नराणां शुभप्रदं स्याद् ग्रहणं रवीन्द्वोः ।*
*द्विसप्तनन्देषु च मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनीन्द्रैः ॥*

(निर्णयसिन्धुः, षष्ठप्रकरणम्, पृ. १२५)

## ग्रहणशान्तिः

"तत्र शान्तिः पुष्कला चेत्तर्हि दोषो न कश्चन" इति विधानपारिजाते पठितशौनकवचनेन कैश्चिदनुष्ठानविशेषैस्तेषां दोषविशेषाणां प्रशमनं कर्तव्यम्।

तत्र चाशुभफलनिवृत्तये गायत्र्यादीनां मन्त्राणां जपः, स्वर्णादीनां दानम्, गवादीनां दानं भूम्यादीनां दानञ्चेति वैशेषिकमेव। सुवर्णजनितं नागं सतिलं ताम्रभाजनं सदक्षिणं सवस्त्रं श्रोत्रियाय कर्मनिष्ठाय सदाचारयुताय विप्राय देयम्। सुवर्णाभावे राजतं बिम्बं यथाशक्ति निर्माय ग्रहणजनिदोषप्रक्षालनसमर्थशालिने वेदपाठिने विप्राय दातव्यम्। परन्तु यस्य कस्यापि दानस्य महत्फलप्राप्तये देशकालद्रव्यपात्रादीनां प्रमुखं स्थानं भवति । देशकालद्रव्यपात्रादीनां साद्गुण्ये हि फलप्राप्तिर्भवति परन्तु ग्रहणसमये दानकर्मणि देशकालाद्रव्यपात्रादीनां योग्यायोग्यत्वविचारो नैव कर्तव्यः । तस्मात् सर्वतो भावेनैकेन मनसा ग्रस्यमाने स्नानं , ग्रस्ते हवनं, मुच्यमाने दानं मुक्ते स्नानं शुभफलाभिलाषिणा कर्तव्यम्। एतन्मात्रं न तस्मिन्काले जपादिकं सुरार्चनमपि कर्तव्यमेव।

## ग्रहणशान्तिर्हेमाद्रौ मात्स्ये शान्तिसारेऽपि यथा—

यस्य जन्मराश्यादिकमधितिष्ठन् राहुः सूर्यं चन्द्रं वा ग्रसते तेन पुरुषेण शास्त्रोक्तमन्त्रै रौषधैश्च स्नानं प्रथमं कार्यम्। तत्क्रमे ग्रहणसमय एव कर्ता ब्राह्मणान् आमन्त्र्य स्वस्ति वाचनादिकमपि कारयेत् । ब्राह्मणचतुष्टयमेव चन्दनाक्षतमालादिना सम्पूज्य ग्रहणदोषनिवृत्तयेऽत्यावश्यकौषधद्रव्यैश्च सह सजलान् चतुः कलशान् स्थापयेत्। तत्र कलशेषु गाश्वरथ्यावाल्मीकसङ्गमाद् ह्रदाद्गोकुलाद्राजद्वारप्रदेशाश्च मृदमानीय निक्षिपेत् । पुनः पञ्चगव्यं पञ्चरत्नं पञ्चत्वचम्, पञ्चपल्लवम् , रोचनं, पद्मकं, शङ्खं, कुङ्कुमं, रक्तचन्दनम्, शुक्तिम् स्फटिकं, तीर्थजलम्। सितसर्षपान् गुग्गुलान् मधुकं देवदारुविशेषं , विष्णुक्रान्तां, शतावरीम् । बलाम् , सहदेवीम् निशाद्वितयं (रजनीद्वयम्) गजदन्तम्, कुङ्कुमं, उशीरचन्दनम् एतत्सर्वं कलशेषु संस्थाप्य देवान् आवाहयेत्।तदनन्तरं कलशस्थजलेन सविधि स्नानं कर्तव्यम् ।

## ग्रहणजननशान्तिः

चन्द्रसूर्यग्रहणकाले यस्य जन्म भवति तस्य शान्तिरवश्यमेव कर्तव्येति भार्गवेण शौनकायोक्तंविधिविशेषं शान्तिसारे निर्दिष्टमस्ति। न कृते शान्तिविधाने व्याधिपीडादारिद्र्यशोककलहमृत्युप्रभृतिभिः पीडितो भवति समातृको जातकः । प्रथमं तद्दोषशान्तये यस्मिन्नक्षत्रे ग्रहणं जायते तन्नक्षत्राधिपरूपं सूर्यग्रहणे सुवर्णेन चन्द्रग्रहणे रजतेन ग्रहणद्वयेऽपि नागेन (सीसेन) राहुस्वरूपं प्रकल्प्य गोमयोपलिप्ते पवित्रतमे देशे सुशोभनं वस्त्रं संस्थाप्य तदुपरि तेषां चन्द्रसूर्यसैंहिकेयानां स्थापनं कर्तव्यम्। ततः सूर्यप्रीतिकरणाय सूर्यग्रहणे रक्तगन्धाक्षतपुष्पैः चन्द्रग्रहणे चन्द्रप्रीतिकरणाय श्वेतगन्धाक्षतपुष्पमाल्यादिभिः ग्रहणद्वयेऽपि राहुप्रीत्यर्थं कृष्णगन्धाक्षतपुष्पैः नक्षत्राधिपस्य च पूजा कर्तव्या । ततः आकृष्णेनेतिमन्त्रेण सूर्यस्य आप्यायस्वेतिमन्त्रेण चन्द्रस्य स्वर्भानुरितिमन्त्रेण राहोरपि पूजा विधातव्या । पूजासमाप्तौ सूर्यग्रहणे अर्कसम्भवैसमिद्भिश्चन्द्रग्रहणे तु पालाशसमिद्भिः ग्रहणद्वयेऽपि राहुप्रीतये दूर्वाभिः घृतचर्वादिना च जुहुयात्।

ततः पञ्चगव्यैः पञ्चरत्नैः पञ्चत्वक्पञ्चपल्लवैः जलैरौषधकल्कैश्च सहितै कलशोदकैः वारुणसंज्ञकैरापोहिष्ठेमंमेगङ्गातत्त्वायामीतिमन्त्रकैरभिषेकं कुर्यात् । ततो निवृत्ताभिषेको यजमानः सुशान्तो विजितेन्द्रीय सन् आचार्यं सम्पूज्य सयत्नं भक्त्या पूर्वपूजितप्रतिमात्रयं दक्षिणां गामाचार्यायान्येभ्यश्च दद्यात् । एवं कृते ग्रहणजातानां सर्वारिष्टविनाशिका शान्तिर्जायत इति भार्गवशौनकसम्वादरूपं ग्रहणजातानां शान्तिविधानम् ।

## निष्कर्षः

ग्राह्यग्राहकयोरन्तराभावत्वं ग्रहणपदवाच्यमस्ति । चन्द्रसूर्यग्रहणद्वयमेव विश्वस्मिन् विश्वे मानवसमुदाये प्रत्यक्षं प्रभावं जनयति । ग्रहणं हि ग्राह्यग्राहकयोरन्तराभावत्वेन पर्वण्येव सम्भवतीति । परन्तु प्रतिपर्व ग्रहणं न भवति ।ग्रहणमहत्त्वमपि द्विविधमस्ति तद्यथा–वैज्ञानिकं धार्मिकञ्च । ग्रहणकाले स्नानेन दानेन जपेन हवनेन च सुमहत्पुण्यं प्राप्यत इति धार्मिकाणां विश्वासो वर्तते । कदाचिदपर्वण्यपि शशाङ्कार्कग्रहणं त्वष्टानाममहाग्रहहेतोर्भवतीति संहिताकारैरुक्तत्वादौत्पातिकमपि तादृशं ग्रहणं शान्तिविधिना प्रशमयेदिति शास्त्रस्याशयो वर्तते। सामान्यावस्थायामपि गोचरवशेन ग्रहणदौष्ट्ये सति औषधस्नानविधिना गोसुवर्णदानविधिना च शान्तिःकर्तव्या ।

## कार्तज्ञप्रकटनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च हार्दं कार्तज्ञं प्रकटयामि ।

## सन्दर्भग्रन्थसूची

आचार्य भाष्करः, सिद्धान्तशिरोमणिः, (वि.सं.२०५५) सम्पा. डा. मुरलीधरचतुर्वेदी, वाराणसी, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः ।

द्विवेदी डा. कृष्णचन्द्र, सूर्यग्रहणम्, (शाके १८८९) वाराणसी, वाराणसीसंस्कृतविश्वविद्यालयः ।

भट्टः कमलाकरः, निर्णयसिन्धुः, (वि.सं.२०७७) चूडामणि नेपाली टीका, टीकाकारः प्रा.डा. वेणीमाधवढकालः, काठमाडौं विद्यार्थी पुस्तकभण्डारः ।

रामदैवज्ञः, मुहूर्तचिन्तामणिः पीयूषधाराटीकायुक्तः, (वि.सं.२०६३) सम्पा. डा. रामचन्द्रपाठकः, वाराणसी, चौखम्बा-संस्कृत- संस्थानम् ।

वराहमिहिरः, बृहत्संहिता, भट्टोत्पलविवृतिसहिता (प्रथमभागः) (वि.सं.२०५३) सम्पा. डा. कृष्णचन्द्रद्विवेदी, वाराणसी, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः ।

वेदव्यासः, श्रीमद्भागवतमहापुराणम् ३७ तमं संस्करणम्, (वि.सं. २०६९), गीताप्रेसः गोरखपुरम् ।